## 1. प्रथमः पाठः

## मम गृहम्

एषः/एषा/एतत्

मम नाम गोविन्दः ।

एतत् मम गृहम् ।

एषः मम तातः ।

एषा अम्बा ।

-

एषः महानसः ।

एतौ घटौ ।

एते चषकाः ।

एषा स्थालिका ।

एते अग्निपेटिके ।

एताः छुरिकाः ।

-

एतत् उद्यानम् ।

एते फले ।

एतानि पुष्पाणि ।

एषा लता ।

एते मल्लिकालते ।

एताः कुल्याः ।

-

एषः कः ?

एषः हारः ।

एतौ कौ ?

एतौ हस्तौ ।

एते के ?

एते नखाः ।

-

एषा का ?

एषा सञ्चिका ।

एते के ?

एते पत्रिके ।

एताः काः ?

एताः शाटिकाः ।

-

एतत् किम् ?

एतत् मुखम् ।

एते के ?

एते नेत्रे ।

एतानि कानि ?

एतानि कङ्कणानि ।
–
ध्यानेन पठन्तु -
('एतत्' शब्दः)

| – | एक. | द्वि. | बहु. |
|---|---|---|---|
| पुं. | एषः | एतौ | एते |
| स्त्री. | एषा | एते | एताः |
| नपुं. | एतत् | एते | एतानि |

('किम्' शब्दः)

| – | एक. | द्वि. | बहु. |
|---|---|---|---|
| पुं. | कः | कौ | के |
| स्त्री. | का | के | काः |
| नपुं. | किम् | के | कानि |